# Dashavatara-Stavah (Praise to the Ten Incarnations of God)

# दशावतार-स्तवः

## Document Information


Text title : Dashavatara StavaH 2 by Dr. Harekrishna Meher

File name : dashAvatArastavaH2.itx

Category : vishhnu, dashAvatAra, hkmeher

Location : doc_vishhnu

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Description/comments : Stavarchana-Stavakam (Sanskrit Stotra-Kavya)

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : November 11, 2023

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


November 11, 2023

*sanskritdocuments.org*

# दशावतार-स्तवः

धातुः स्तुत्या चिर-जलचरीं दिव्य-मूर्त्तिं दधानो
हत्वा शङ्खासुरमपहृताम्नायमम्भोधि-निम्ने ।
यो वेदानामसि विहितवान् राक्षसारिः सुरक्षां
विश्वेश ! त्वां वर सुमनसां मीनमाद्यं नमामि ॥ १॥

द्वन्द्वाद् दैत्यादितिज-निहितं मन्दराद्रिं समुद्रे
यः संन्यस्याखिल-दिविषदां श्रेष्ठतायै स्वपृष्ठे ।
अब्धौ लब्ध्वा प्रमथन-सुखं स्तब्धवाँल्लुब्ध-दैत्यान्
पीयूषाद्-प्रियवर ! सदा नौमि कूर्मं निकामम् ॥ २॥

ब्रह्म-स्तुत्योदवहदवनीं प्राणिनां सृष्टि-हेतो-
र्यो दन्ताग्रे विपुल-सलिले मज्जितामुग्र-रूपः ।
दंष्ट्राघात-प्रहरण-हिरण्याक्ष-रक्षो-विघातिन् !
देवं वन्दे धरणि-धर हे ! त्वा वराहं सदाहम् ॥ ३॥

घोरं धृत्वाद्भुतमपघनं यो हिरण्यासुहारी
वक्षो रक्षोजन-कुल-पते-र्येन भिन्नं नखाग्रैः ।
प्रह्लादान्तःकरण-परमाह्लादकं भीम-कान्तं
नौमीश ! त्वां शरण-कषणं संहरन्तं नृसिंहम् ॥ ४॥

देवत्राता त्रिपद-मित-भू-दान-याञ्चा-मिषेण
स्वर्गं भव्यं भुवनमहरद् विश्व-वेशो बलेर्यः ।
खर्वीकुर्वन् विभव-विपुलं कर्बुरेशस्य गर्वं
वन्द्यं वृन्दारक-सुभगदं वामन ! त्वां नतोऽस्मि ॥ ५॥

हत्वा दृप्तान् प्रसभमवनीं पर्यटन् कार्त्तवीर्यान्
रक्तैस्तेषां निज-पितृकुलं तोषयामास वीरः ।
रामं शूरं कलुष-हरणं रेणुका-नन्दन ! त्वां
कालाग्न्याभं कलित-परशुं जामदग्न्यं भजामि ॥ ६॥

पित्रादेशाद् दशरथ-सुतः सत्य-सन्धो जगत्यां
त्यक्त्वा राज्यं विपिनमगमद् भार्यया चानुजेन ।
यः पौलस्त्यं दनुजमवधीद् देव-कार्यार्थ-सिद्ध्यै
सीतेश ! त्वां रघुकुल-पतिं रामचन्द्रं स्मरामि ॥ ७॥

नन्दानन्दो भुवन-महितो रोहिणी-नन्दनो यः
शेषापीड़ोऽहरदतितरां पार्थिवानर्थ-मन्दान् ।
त्वां गोविन्दाग्रज ! तपनजा-भेदनं रेवतीशं
वन्दे रामं सहल-मुषलं कामपालं प्रकामम् ॥ ८॥

शुष्कं मत्वा भवमथ चतुष्कोटि-निर्मुक्त-तत्त्वं
सारं ज्ञात्वा सुगत ! जगतो यो जगादास्थिरत्वम् ।
त्वां निर्वाणाविचलित-मतिं नौम्यहं सौम्य-शीलै-
र्वेद-द्वाराध्वर-पशु-विधे-र्बिद्धकृद्-बुद्ध-रूपम् ॥ ९॥

दग्ध्वानर्थान् वृजिन-जनितान् धर्म-संस्थापनार्थं
काले घोरे कलुषित-कलौ मर्त्त्य-लोकार्त्ति-हर्त्ता ।
घृण्याचारान् चिरमतिशयं शातयन्तं सुपुण्यैः
स्तौमि त्वां भोस्त्रिभुवन-विभो ! कल्किदेवं सदैवम् ॥ १०॥

सृष्टि-स्थित्यन्तकर ! जगतां हे मुकुन्दादिकन्द !
ज्ञेयो वेदैः परम-पुरुषः स्वप्रकाशस्त्वमेकः ।
क्लेशं कृत्स्नं हर हर हरे कृष्ण मे हे रमेश !
स्तुत्यं सर्वैस्तव दशविधं नौमि नामावतारम् ॥ ११॥

– रचयिता : डॉ हरेकृष्ण-मेहेरः

Copyright Dr.Harekrishna Meher

*Dashavatara-Stavah (Praise to the Ten Incarnations of God)*
pdf was typeset on November 11, 2023

Please send corrections to *sanskrit@cheerful.com*